

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Checked 2017

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह
दाखल क्र. M2241 विषय वैदिक
नाव गोपथब्राह्मण पूर्वार्ध (भूमिका)
लेखक / लिपीकार —
पृष्ठ 10 काळ — पूर्ण / अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः " ॥ अथ गणपत्यथर्वशीर्षप्रारम्भः ॥ ॐनमस्ते गणपतये ॥ त्वमेव प्रत्यक्षं तत्वमसि त्वमेव केवलं कर्तासि त्वमेव कवेलं धर्तासि ॥ त्वमेव केवलं हर्तासि ॥ त्वमेव सर्वं खल्विदं ब्रह्मासि ॥ त्वं साक्षादात्मासि नित्यम् ऋतं वच्मि सत्यं वच्मि ॥ अव त्वं माम्॥अववक्तारम् ॥ अव श्रोतारम् ॥ अव दातारम् ॥ अवं धातारम् ॥अवानूचानमवशिष्यम् ॥ अव पश्चात्तात् ॥ अव पुरस्तात् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अवोत्तरोत्तरात्तात् अव दक्षिणात्तात्॥ अव चोर्ध्वा
त्तात् ॥ अवाधरात्तात् ॥ सर्वतो मां पाहि पाहि स
मंतात् ॥ त्वंवाङ्मयस्त्वं चिन्मयः ॥ त्वमानंदमय
स्त्वं ब्रह्ममयः ॥ त्वं सच्चिदा नंदाद्वितीयोऽसि ॥ त्वं
प्रत्यक्षंब्रह्मासि॥त्वं ज्ञानमयो विज्ञानमयोऽसि ॥ सर्वं
जगदिदं त्वत्तो जायते ॥ सर्वं जगदिदंत्वत्तस्तिष्ठ
ति ॥ सर्वं जगदिदं त्वयि लय मेष्यति ॥ सर्वं जग
दिदं त्वयि प्रत्येति ॥ त्वं भूमिरापो नलोऽनिलो न

नभः ॥ त्वं चत्वारि वाक् पदानि॥त्वं गुणत्रयातीतः
॥ त्वं कालत्रयातीतः ॥ त्वं देहत्रयातीतः ॥ त्वं मूल-
धारस्थितोऽसि नित्यम् ॥ त्वं शक्तित्रयात्मकः ॥
त्वां योगिनो ध्यायंति नित्यम् ॥ त्वं ब्रह्मा त्वं
विष्णुस्त्वं रुद्रस्त्वं मिंद्रस्त्वं मग्निस्त्वं वायुस्त्वं
सूर्यस्त्वं चंद्रमास्त्वं ब्रह्म भूर्भुवः स्वरोम् ॥ गणा-
दीन् पूर्वमुच्चार्य वर्णादींस्तदनन्तरम् ॥ अनुस्वारः
परतरः अर्धेंदुलसितम् ॥ तारेण रुद्धम् ॥ एतत्तव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनुस्वरूपम् ॥ गकारः पूर्व रूपम् ॥ अकारो मध्य
मरूपम् ॥ अनुस्वार श्चांत्यरूपम् ॥ बिंदुरुत्तर
रूपम् ॥ नादः संधानम् ॥ सँहिता संधिः ॥ सैषा
गणेश विद्या ॥ गणक ऋषिः ॥ निचृद्गायत्रीच्छंदः ॥
गणपतिर्देवता ॥ ॐगं गणपतये नमः ॥ एकदंताय
विद्महे वक्रतुंडाय धीमहि ॥ तन्नो दंतिः प्रचो-
दयात् ॥ एकदंतं चतुर्हस्तं ॥ पाशमंकुशधारिणम् ॥
रदं च वरदं हस्तैर्बिभ्राणं मूषकध्वजम् ॥ रक्तं

लंबोदरं शूर्प कर्णकं रक्तवाससम् ॥ रक्तगंधानु-
लिप्तांगं रक्तपुष्पैः सुपुजितम् ॥ भक्ता नु कंपितं देवं
जगत्कारणमच्युतम् ॥ आविर्भूतं च सृष्टयादौ
प्रकृतेः पुरुषात्परम् ॥ एवं ध्यायतियो नित्यं स
योगी योगिनां वरः॥नमो व्रातपतये नमो गणपतये
नमः प्रमथपतये नमस्ते अस्तु लंबोदरा यैकदंताय
विघ्ननाशिने शिवसुताय वरद मूर्तये नमः ॥ एतद्अ-
र्वशीर्ष योऽधीते ॥ सब्रह्मभूयाय कल्पते ॥ स सर्व-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विघ्नैर्न बाध्यते ॥ सर्वतः सुखमेधते ॥ स पंच म
हापापात्प्रमुच्यते ॥ सायमधीयानो दिवसकृत पापं
नाशयति ॥प्रातरधी यानो रात्रिकृतं पापं नाशयति
सायं प्रातःप्रयुंजानो अपापो भवति ॥ सर्वत्राधीया-
नोऽपविघ्नो भवति ॥ धर्मार्थ काममोक्षं च विन्दति॥
इदमथर्वशीर्षम् शिष्याय न देयम्॥ योयदि मोहा-
द्दास्यति ॥ स पापीयान्भवति ॥ सहस्रावर्तनात्॥
यं यं काममधीते ॥ तंत मनेनसाधयेत् ॥ अनेन

गणपतिमभिषिंचति॥ स वाग्मी भवति॥चतुर्थ्यामन
श्नञ्ज पति ॥ स विद्यावान्भवति ॥ इत्यथर्वणवा
क्यम् ॥ ब्रह्माद्याचरणं विद्यात् ॥ न बिभेति कदाच-
नेति ॥ यो दूर्वाकुरैर्यजति ॥ सवैश्रवणोपमो भवति॥
यो लाजैर्यजति ॥ सयशोवान्भवति ॥ स मे धावा-
न्भवति ॥ यो मोदकसहस्रेण यज ति ॥ स वाञ्छि
तफलमवाप्नोति ॥ यः साज्यसमिद्भिर्यजति ॥ स
सर्व लभते स सर्व लभते ॥ अष्टौ ब्राह्मणान्सम्यग्ग्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हयित्वा ॥ सूर्यवर्चस्वी भवति ॥ सूर्यग्रहे महानद्यां
प्रतिमासन्निधौ वा जप्त्वा ॥ सिद्धमंत्रो भवति ॥
महाविघ्नात्प्रमुच्य ते ॥ महादोषात्प्रमुच्यते ॥ महा-
पापात्प्रमुच्यते ॥ स सर्वविद्भवति स सर्वविद्भवति ॥
य एवं वेद ॥ इत्युपनिषत् ॥ सहनाभवतु ॥ सह नौ
भुनक्तु ॥ सह वीर्यं करवावहै ॥ तेजस्विनावधी
तमस्तु माविद्विषावहै ॥ ॐशान्तिः शान्तिःशान्तिः
॥ इति गणपत्यथर्वशीर्षं समाप्तम् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=13.09.19 15:47
,TRANSFERRED=2019/09/13 at 15:50:39
,PAGES=6
,TYPE=STD
,NAME=S0001783
,Book Name=M-2241-GANPATI ATHAVARSHISH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection